# मण्डूकः मूषिकश्च

कस्मिंश्चित् तटाके कोऽपि मण्डूकः अवर्तत्। तस्य तटाकस्य तीरे कश्चन मूषिकः वसति स्म। कालक्रमेण मण्डूकः मूषिकश्च मित्रे अभवताम्। कदाचित् मूषिकः तटाके प्लवनं ऐच्छत्। किन्तु सः प्लवनं न जानाति स्म। अतः तौ आलोच्य रज्ज्वा स्वपादौ अबध्नीताम्। मण्डूकः जले उत्प्लुत्य इतस्ततः प्लवते स्म। तत्पादबद्धः मूषकः अपि तेन सह जले अचरत्। इत्थं तौ चिराय जले प्लवनसुखं अन्वभवताम्।

तस्मिन् समये कश्चित् गृध्रः आकाशे डयते स्म। सः जलोपरि प्लवमानं मूषिकं अपश्यत्। सः झडिति स्वपादाभ्यां तं अगृह्णात्। हन्त! मूषिकेन सह तत्पादबद्धः मण्डूकोऽपि लम्बते स्म।

गृध्रः मण्डूकमूषिकौ प्राप्य तुष्टः अभक्षयत्। स्थलवासी मूषिकः जलवासिना मण्डूकेन सह मैत्रीं अकरोत्। तेन उभावपि सहैव मृत्युं प्राप्तवन्तौ। अतः समयोरेव मैत्री शोभते।